श्री विष्णु पंजर स्तोत्रं

श्री विष्णु पंजर स्तोत्रं

विनियोगः –

अस्य श्रीविष्णुपंजरस्तोत्रमंत्रस्य नारद ऋषिः अनुष्टुप् छंदः श्रीविष्णुः परमात्मा देवता अहं बीजं सोऽहं शक्तिः ॐ ह्रीं कीलकं मम सर्वदेहरक्षणार्थं जपे विनियोगः ||

ऋष्यादिन्यासः –

नारद ऋषये नमः मुखे |

श्रीविष्णुपरमात्मदेवतायै नमः हृदये |

अहं बीजं गुह्ये |

सोऽहं शक्तिः पादयोः |

ॐ ह्रीं कीलकं पादाग्रे |

ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः इति मंत्रः |

करन्यासः –

ॐ ह्रां अंगुष्ठाभ्यां नमः |

ॐ ह्रीं तर्जनीभ्यां नमः |

ॐ ह्रूं मध्यमाभ्यां नमः |

ॐ ह्रैं अनामिकाभ्यां नमः |

ॐ ह्रौं कनिष्ठिकाभ्यां नमः |

ॐ ह्रः करतलकरपृष्ठाभ्यां नमः |

हृदयादिन्यासः –

ॐ ह्रां हृदयाय नमः |

ॐ ह्रीं शिरसे स्वाहा |

ॐ ह्रूं शिखायै वषट् |

ॐ ह्रैं कवचाय हुं |

ॐ ह्रौं नेत्रत्रयाय वौषट् |

ॐ ह्रः अस्त्राय फट् |

अहंबीजप्राणायामं मंत्रत्रयेण कुर्यात् |

अथ ध्यानं |
परं परस्मात् प्रकृतेरनादि-
-मेकं निविष्टं बहुधा गुहायां |
सर्वालयं सर्वचराचरस्थं
नमामि विष्णुं जगदेकनाथं || 1 ||

अथ पंजर स्तोत्रं |
ॐ || विष्णुपंजरकं दिव्यं सर्वदुष्टनिवारणं |
उग्रतेजो महावीर्यं सर्वशत्रुनिकृंतनं || 2 ||

त्रिपुरं दहमानस्य हरस्य ब्रह्मणोदितं |
तदहं संप्रवक्ष्यामि आत्मरक्षाकरं नृणां || 3 ||

पादौ रक्षतु गोविंदो जंघे चैव त्रिविक्रमः |
ऊरू मे केशवः पातु कटिं चैव जनार्दनः || 4 ||

नाभिं चैवाच्युतः पातु गुह्यं चैव तु वामनः |
उदरं पद्मनाभश्च पृष्ठं चैव तु माधवः || 5 ||

वामपार्श्वं तथा विष्णुर्दक्षिणं मधुसूदनः |
बाहू वै वासुदेवश्च हृदि दामोदरस्तथा || 6 ||

कंठं रक्षतु वाराहः कृष्णश्च मुखमंडलं |
माधवः कर्णमूले तु हृषीकेशश्च नासिके || 7 ||

नेत्रे नारायणो रक्षेल्ललाटं गरुडध्वजः |
कपोलौ केशवो रक्षेद्वैकुंठः सर्वतोदिशं || 8 ||

श्रीवत्सांकश्च सर्वेषामंगानां रक्षको भवेत् |
पूर्वस्यां पुंडरीकाक्ष आग्नेय्यां श्रीधरस्तथा || 9 ||

दक्षिणे नारसिंहश्च नैर्ऋत्यां माधवोऽवतु |
पुरुषोत्तमो मे वारुण्यां वायव्यां च जनार्दनः || 10 ||

गदाधरस्तु कौबेर्यामीशान्यां पातु केशवः |
आकाशे च गदा पातु पाताले च सुदर्शनं || 11 ||

सन्नद्धः सर्वगात्रेषु प्रविष्टो विष्णुपंजरः |
विष्णुपंजरविष्टोऽहं विचरामि महीतले || 12 ||

राजद्वारेऽपथे घोरे संग्रामे शत्रुसंकटे |
नदीषु च रणे चैव चोरव्याघ्रभयेषु च || 13 ||

डाकिनीप्रेतभूतेषु भयं तस्य न जायते |
रक्ष रक्ष महादेव रक्ष रक्ष जनेश्वर || 14 ||

रक्षंतु देवताः सर्वा ब्रह्मविष्णुमहेश्वराः |
जले रक्षतु वाराहः स्थले रक्षतु वामनः || 15 ||

अटव्यां नारसिंहश्च सर्वतः पातु केशवः |
दिवा रक्षतु मां सूर्यो रात्रौ रक्षतु चंद्रमाः || 16 ||

पंथानं दुर्गमं रक्षे सर्वमेव जनार्दनः |
रोगविघ्नहतश्चैव ब्रह्महा गुरुतल्पगः || 17 ||

स्त्रीहंता बालघाती च सुरापो वृषलीपतिः |
मुच्यते सर्वपापेभ्यो यः पठेन्नात्र संशयः || 18 ||

अपुत्रो लभते पुत्रं धनार्थी लभते धनं |
विद्यार्थी लभते विद्यां मोक्षार्थी लभते गतिं || 19 ||

आपदो हरते नित्यं विष्णुस्तोत्रार्थसंपदा |
यस्त्विदं पठते स्तोत्रं विष्णुपंजरमुत्तमं || 20 ||

मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति |
गोसहस्रफलं तस्य वाजपेयशतस्य च || 21 ||

अश्वमेधसहस्रस्य फलं प्राप्नोति मानवः |
सर्वकामं लभेदस्य पठनान्नात्र संशयः || 22 ||

जले विष्णुः स्थले विष्णुर्विष्णुः पर्वतमस्तके |
ज्वालामालाकुले विष्णुः सर्वं विष्णुमयं जगत् || 23 ||

इति श्रीब्रह्मांडपुराणे इंद्रनारदसंवादे श्री विष्णु पंजर स्तोत्रं ||